**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तुरीया परीक्षा**

**द्वितीयपत्रिका**

दिनाङ्कः 03-09-2023 | अङ्काः - 50

अपराह्ने – 1:30 तः 3:00 पर्यन्तम् | समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि। (नवमप्रश्नं विना)

1 **विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत।** 5

१. श्रीकृष्णः २. सत्सङ्गतिः ३. तीर्थक्षेत्रम्

2 (अ) द्वितीया विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) तिङ्-प्रत्ययाः नाम के ? ते कति ? लिट्-लकार-परस्मैपदप्रत्ययान् लिखत । 4

3 (अ) उत्प्रेक्षा-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) "प्रतियातमिवान्तिकमस्य गुरोः"- एतस्य वृत्तं सलक्षणं विवृणुत । 4

4 **उत्तरं लिखत । (त्रयाणामेव)** 3

१. अल्पविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

२. 'अन्तरेण' शब्दयोगे का विभक्तिः प्रयोक्तुं शक्यते ?

३. काव्येषु के के अर्थाः भवन्ति ?

४. आदिगुरुः कः गणः भवति (छन्दोरीत्या) ?

5 . **द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** 6

१. जीयात् २. अवर्तिष्यत ३. चक्रे ४. अगमत्

6. **प्रयोगपरिवर्तनं कुरुत । (द्वावेव)** 4

१. मया अलज्ज्यत । २. कृष्णेन कालियफणासु नर्तितम् ।

३. तमः नश्यतु ।  ४. युष्माभिः सायङ्काले क्रीडनीयम् ।

7 **वाक्यदोषं परिहरत ।** 4

१. विष्णुः वैकुण्ठे अधिशेते ।  ३. रजतं सुवर्णस्य भिन्नम् ।

२. भर्तुः समं सीता वनं गता ।  ४. रावणः रामात् क्रुध्यति ।

8 **टिप्पणीं लिखत । (एकस्य)** 2

१. सति-सप्तमी  २. लृङ्-लकारः

9 **मातृभाषया अनुवदत ।** 5

१. बहु जगद पुरस्तात् तस्य मत्ता किलाहम् ।

२. अधितिष्ठत्युदयगिरिं चन्द्रमसि विवेश लङ्कां हनूमान् ।

३. मोक्षसाधनानां भक्तिर्गरीयसी ।

४. भेतव्यं पापात्, लज्जितव्यं दुस्तर्कात् ।

५. कः खलु नाम प्रवचनसमये शब्दम् अकरिष्यत् ?

10 **संस्कृतभाषया परिवर्तयत ।** 5

१. ಭಾಷೆಗಳಲ್ಲಿ ಸಂಸ್ಕೃತಭಾಷೆ ಮಧುರವಾದುದು.

Among the languages, Sanskrit is the sweetest.

२. ಲಕ್ಷ್ಮಣನು ಬಂದಿದ್ದರೆ ರಾವಣನು ಸೀತೆಯನ್ನು ಅಪಹರಿಸಲು ಸಾಧ್ಯವಾಗುತ್ತಿರಲಿಲ್ಲ.

If Lakshmana had come, Ravana couldn't have kidnapped Sita.

३. ಚಾಣೂರ-ಮುಷ್ಟಿಕ ಎಂಬ ಇಬ್ಬರು ಜಟ್ಟಿಗಳಿದ್ದರು.

There were two wrestlers called Chanoora and Mushtika.

४. ಅವಳು ಭಾರತೀಯ ಸಂಸ್ಕೃತಿಯನ್ನು ಕುರಿತು ಸಭೆಯಲ್ಲಿ ಮಾತಾಡುವಳು.

She will speak about Indian culture in the sabha.

೫. ನೀವೆಲ್ಲರೂ ಸುಖವಾಗಿ ಬಾಳಿ. May you all live happily.

---------------------------